श्रीगणेशाय नमः ॥ विषयादिसद्भावाद्ब्रह्मविचार आरब्धव्यः ॥१॥ जगज्जन्मा
दिकारणत्वं ब्रह्मलक्षणं ॥२॥ ब्रह्म वेदस्य कारणं ॥ वेदैकप्रमाणकं च ॥३॥
वेदांता ब्रह्मबोधकाः स्वप्रधानब्रह्मबोधकाश्च ॥४॥ ईक्षितृ ब्रह्म ॥५॥ ५८
आनंदमयो ब्रह्मपुच्छं ब्रह्म स्वप्रधानं च ॥६॥ एषोंतरादित्ये हिरण्मयः पुरुष ई
श्वरः ॥७॥ आकाशः परमात्मा ॥८॥ प्राणमिति होवाचेत्यत्र प्राणः ॥९॥ यदतः
परो दिवो ज्योतिरीश्वरः ॥१०॥ प्रतर्दनाख्यायिकायां प्राणादिपदं ब्रह्मार्थं ॥११
प्रथमाध्यायस्य प्रथमः पादः ॥ अथ मनोमयः प्राणशरीरो भारूपः परमा
त्मा ॥१॥ ईश्वरोत्ता ॥२॥ गुहां प्रविष्टौ जीवेश्वरौ ॥३॥ य एषोंतरक्षिणि पुरु
षः परमात्मा ॥४॥ ईश्वरोंतर्यामी ॥५॥ भूतयोनिरीश्वरः ॥६॥ वैश्वानर ई
श्वरः ॥७॥ प्र० द्वि० ॥ अथ द्युभ्वाद्यायतनं ब्रह्म ॥१॥ भूमा ब्रह्म ॥२॥ अक्ष १

बालाक्यजातशत्रुसंवादे पुरुषाणां पुरुष्कर्तेश्वरः ॥५

रं ब्रह्म ॥३॥ परं पुरुषमभिध्यायीतेति ब्रह्मैव ध्येयतोक्तिः ॥४॥ दहरवाक्ये ब्रह्मैवोपास्यं ॥५॥ इंद्रविरोचनप्रजापतिसंवादे अक्षिणि पुरुष ईश्वरः ॥६॥ न तत्र सूर्यो भातीत्यत्र सर्वविभासकं चैतन्यं ॥७॥ अंगुष्ठमात्रः पुरुष ईश्वरः ॥८॥ ब्रह्मविद्यायां देवानामृषीणां चास्त्यधिकारः ॥९॥ ननु शूद्रस्य ॥१०॥ महद्भयं वज्रं ब्रह्म ॥११॥ ज्योतिर्ब्रह्म ॥१२॥ नामरूपयोर्निर्वहिता काशः परमात्मा ॥१३॥ विज्ञानमयो ब्रह्म ॥१४॥ प्र० ॥१०॥ अथ महतः परमव्यक्तं वपुः ॥१॥ अजाशब्देन तेजोबन्नात्मिका प्रकृतिः स्मृतिः ॥२॥ पंच पंचजनाः प्राणचक्षुःश्रोत्रमनोस्य नाभावे एकेषां ज्योतिषा संख्यापूर्तिः ॥३॥ अविरोधाज्जगत्कारणोसमन्वयः ॥४॥ जगत्कर्ता परमात्मैव ॥५॥ आत्मा द्रष्टव्यो संसारी ॥६॥ निमित्तमुपादानं ब्रह्म ॥७॥ परमाणुप्राण्वादीनां न केचिज्जगत्कारणत्वं ॥८॥ प्रथमः ॥१॥ सांख्यस्मृत्यावेदस्यसंकोचो नयुक्तः ॥१॥ पातंजलप्रधानादौ न प्रमाणं ॥२॥

कण्वानां ८ च

२ क न ति

३अचेतनंजगच्चेतनाद्ब्रह्मणोजायते॥३॥काणादादिशास्त्रैर्नसमन्वयबाधः॥४॥
नप्रत्यक्षेणाद्वैतबाधः॥५॥कार्यस्यकारणाभेदादद्वैतंब्रह्मणतात्त्विकं॥६॥नहि
ताकरणादिदोषप्रसक्तिरीश्वरस्य॥७॥वस्तुतोऽद्वितीयंमायासहायंक्रमेणा
नेकंकारणं॥८॥नवास्तवपरिणामेदोषः॥९॥अशरीरस्यब्रह्मणोमायासद्भावः
श्रौतः॥१०॥निसत्तोपीश्वरःप्रयोजनापेक्षोजगत्सृजति॥११॥नवैषम्य
नैर्घृण्यापत्तिरीश्वरस्य॥१२॥निर्गुणस्यापिप्रवृत्तिर्योपपत्तिः॥१३॥द्वि०
प्र०॥अथनप्रधानंजगद्धेतुः॥१॥विसदृशोत्पत्तौकाणादसिद्धान्तः॥२
संयुक्तेभ्यःपरमाणुभ्योजगज्जनिरितिमतापास्तिः॥३॥नपृथक्तुसमुदायद्व
यं॥४॥नविज्ञानमात्रंतत्त्वं॥५॥सप्तभंगीनयभंगः॥६॥तटस्थेश्वरवा
ददूषणं॥७॥पांचरात्रिकमतापास्तिः॥८॥द्वि०द्वि०॥अथब्रह्मणोव्योमजा
यते॥१॥भूतदिशापि॥२॥ब्रह्मनजायते॥३॥वायुरूपापन्नाद्ब्रह्मण
स्तेजोजायते॥४॥अग्निरूपापन्नादापः॥५॥अद्भ्यःपृथिवी॥६॥व्योमाद्यु

वे नो २

तेनाऽऽश्रुतीतद्ब्रह्मणांसमन्वयः ॥२॥ यएवसुप्तः सएवप्रतिबुध्यते ॥३॥ जाग्रत्स्व
प्नसुषुप्तिभ्योऽन्यामूर्छावस्था ॥४॥ नीरूपंनसगुणंब्रह्म ॥५॥ नेतिनेतीवाक्येन ति
ब्रह्मणोननिषेधः ॥६॥ अद्वितीयंब्रह्म ॥७॥ कर्मफलदातापरेशः ॥८॥ तृ०द्वि०१
अथनशाखाभेदादुपासनाभेदः ॥१॥ शाखांतरस्थागुणाउपसंहार्याः ॥२॥
उद्गीथाविद्याभेदोवेद्यभेदात् ॥३॥ ओमित्येतदक्षरमुद्गीथावयवउपास्यः ॥४॥
यएवमितिशब्दाद्वसिष्ठत्वाद्युपसंहारः ॥५॥ आनंदादयउपसंहर्तव्याः ॥६॥
पुरुषएवज्ञातव्यः ॥७॥ आत्मावाद्वदामितीश्वरआत्मा ॥८॥ सदात्मशब्द
योरेकपरत्वंच ॥८॥ आचमनस्यप्राणवासनताबुद्धिर्विधेया ॥९॥ शां
डिल्यविद्यैका ॥१०॥ अहरितिनाम्नोऽहमितिनाम्नश्चव्यवस्था ॥११॥ ह ॥
संभृत्याद्योनोपसंहार्याः ॥१२॥ पुरुषविद्याभिद्यते ॥१३॥ नविद्यांगत्वंम
न्त्रकर्मणोः ॥१४॥ उपायनोपसंहारोविधूननंपरित्यागश्च ॥१५॥ उपास्य
साक्षात्कर्तैकृतसुकृतदुष्कृतयोःपरित्यागः ॥१६॥ अर्चिरादिमार्गउपास

कस्यैव ॥१७॥ सर्वोपास्तिषु नरमार्गः ॥१८॥ तत्त्वविदां मुक्तिर्निश्चितैव ॥१९॥ निषे
धाउपसंहार्यो ॥२०॥ तं पिबंतौ द्वा सुपर्णेत्येकाविद्या ॥२१॥ उषस्तु कहो
लब्राह्मणयोर्विद्यैका ॥२२॥ व्यतिहारेणाद्वैधाबुद्धिः ॥२३॥ सत्यविद्यैका ॥२४
दुपसंहारो व्योम्नोर्दहरहार्दयोः ॥२५॥ भोजनलोपे प्राणाहुतिलोपः ॥२६॥
कर्मस्वनियमोपास्तिः ॥२७॥ एकस्यापि वायोः स्थानभेदास्त्यधिकेता ॥२८॥
स्वतंत्रविद्यालंमनाश्विनौ दाक्षीनां ॥२९॥ देहव्यतिरिक्त आत्मा ॥३०॥ के
चिद्धितोपासना शाखांतरे गच्छति ॥३१॥ वैश्वानरविद्या समस्तो
पासनं ॥३२॥ विद्याभिन्ना ॥३३॥ उपासनाविकल्पः ॥३४॥ प्रतीकोपा
सनायथाकामं ॥३५॥ कर्मांगेषूपासनेषु विकल्पसमुच्चयौ यथाकामं ॥३६॥
का
॥८॥८०॥ अथात्मज्ञानं स्वतः पुमर्थहेतुः ॥१॥ अस्ति तुर्य आश्रमः
कर्मत्यागिन एव ब्रह्मनिष्ठा च ॥२॥ स्तुतिमात्रं वा विध्येयं ॥३॥ अथ हया
श्ववत्स्य स्येति निघोस्तानकमारभ्यार्थं ॥४॥ विद्याफलदाने कर्मानपेक्षा ॥५

6

पश्वादीनिशमादीनिचविद्योत्पत्तावपेक्ष्यंते ॥६॥ सर्वान्नाभ्यनुज्ञा आपदि ॥७
यज्ञादीनां सहकृत्प्रयोगः ॥८॥ विधुरादेरप्यधिकारस्ति ज्ञाने ॥९॥ आश्रमाणां नत्यक्
कर्म ॥१०॥ ऊर्ध्वरेतसोभ्रंशे प्रायश्चित्तं ॥११॥ शुद्धोपि न व्यवहार्यः ॥१२
कर्मांगोपासनमृत्विजां ॥१३॥ निदिध्यासनात्मकं मौनं विधेयं ॥१४॥
भावबुद्धिर्बाल्यं ॥१५॥ इहजन्मांतरेवाज्ञानोत्पत्तिः ॥१६॥ मुक्तौ न तारत
म्यं ॥१७॥ तृ० पा० ॥ अथ श्रवणमावर्तनीयं ॥१॥ आत्मत्वेन ब्रह्मग्रहः ॥२
न प्रतीकेऽहं दृष्टिः ॥३॥ प्रतीके ब्रह्मबुद्धिः ॥४॥ अंगेष्वादित्यादिदृष्टिः ॥५
आसीन उपासीत ॥६॥ न दिग्गादिनियमः ॥७॥ आमरणमुपास्तिः ॥८
न ज्ञानिनः पापसंबंधः ॥९॥ न पुण्यसंबंधः ॥१०॥ न प्रारब्धयोर्नाशः ॥११
नानिसकर्मणः सर्वथा नाशः ॥१२॥ सोपासन निरुपासनयोस्तारत
म्येन विद्योपयोगित्वं ॥१३॥ न कर्मवत्क्राद्धिद्यालोपः ॥१४॥ च० प्र० ॥
अथ वागादीनां मनसि वृत्तिलयः ॥१॥ मनसः प्राणे वृत्तिलयः ॥२॥ ४
स्या०१

य

प्राणो जीवे लीनो भूत्वा भूतेषु लीयते ।।३।। समानाऽऽक्रांत्योपासकोत्क्रांतिः ।।४
उपासकस्य कर्मिणश्च रस्या भूतलयः परदेवतायां ।।५।। उत्क्रांतस्य पादनं देहः ।।६
परमात्मनि तत्त्वविदः प्राणलयः ।।७।। वागादीनां परमात्मनि निःशेषेण
लयः ।।८।। मूर्द्धन्यनाड्योपासको गच्छति ।।९।। निश्यपि स्मृतो रश्मीन्
याति ।।१०।। दक्षिणायनेपि स्मृतो विद्याफलं प्राप्नोति ।।११।। च० द्वि०।।
अर्चिरादिमार्गएव ।।१।। संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ ।।२
विद्युल्लोकोपरि वरुणलोकः ।।३।। आतिवाहिका अर्चिरादयः ।।४
उत्तरमार्गेणाप्राप्यमपरं ब्रह्म ।।५।। नप्रतीकोपासकानां सत्यलोकप्रा
प्तिः ।।६।। च० तृ० अथ मुक्तिरात्मस्वरूपा ।।१।। ब्रह्माभिन्ना ।।२।।
युगपत्सविशेषनिर्विशेषत्वे ।।३।। संकल्पो भोग्यस्य हेतुः ।।४
एकस्यैव देहभावाभावौ ।।५।। सात्मकाः सर्वदेहाः ।।६।। भोगमोक्षयोः
स्वातंत्र्यमस्ति ।।७।। इति चतुर्थाध्यायः ।। वेदांती महादेवभट्टकृतःशारी
रकार्थसंक्षेपः ।। शाके १६९४ आषा० शु
१५

8